# ૩ યોહનઃ પત્રં

I પ્રાચીનો ઽહં સત્યમતાદ્ યસ્મિન્ પ્રીયે તં પ્રિયતમં ગાયં પ્રતિ પત્રં લિખામિ।
II હે પ્રિય, તવાત્મા યાદૃક્ શુભાન્વિતસ્તાદૃક્ સર્વ્વવિષયે તવ શુભં સ્વાસ્થ્યઞ્ચ ભૂયાત્।
III ભ્રાતૃભિરાગત્ય તવ સત્યમતસ્યાર્થતસ્ત્વં કીદૃક્ સત્યમતમાચરસ્યેતસ્ય સાક્ષ્યે દત્તે મમ મહાનન્દો જાતઃ।
IV મમ સન્તાનાઃ સત્યમતમાચરન્તીતિવાર્ત્તાતો મમ ય આનન્દો જાયતે તતો મહત્તરો નાસ્તિ।
V હે પ્રિય, ભ્રાતૃન્ પ્રતિ વિશેષતસ્તાન્ વિદેશિનો ભૃાતૃન્ પ્રતિ ત્વયા યદ્યત્ કૃતં તત્ સર્વ્વં વિશ્વાસિનો યોગ્યં।
VI તે ચ સમિતેઃ સાક્ષાત્ તવ પ્રમ્નઃ પ્રમાણં દત્તવન્તઃ, અપરમ્ ઈશ્વરયોગ્યરૂપેણ તાન્ પ્રસ્થાપયતા ત્વયા સત્કર્મ્મ કારિષ્યતે।
VII યતસ્તે તસ્ય નામ્ના યાત્રાં વિધાય ભિન્નજાતીયેભ્યઃ કિમપિ ન ગૃહીતવન્તઃ।
VIII તસ્માદ્ વયં યત્ સત્યમતસ્ય સહાયા ભવેમ તદર્થમેતાદૃશા લોકા અસ્માભિરનુગ્રહીતવ્યાઃ।
IX સમિતિં પ્રત્યહં પત્રં લિખિતવાન્ કિન્તુ તેષાં મધ્યે યો દિયત્રિફિઃ પ્રધાનાયતે સો ઽસ્માન્ ન ગૃહ્લાતિ।
X અતો ઽહં યદોપસ્થાસ્યામિ તદા તેન યદ્યત્ ક્રિયતે તત્ સર્વ્વં તં સ્મારયિષ્યામિ, યતઃ સ દુર્વ્વાક્યૈરસ્માન્ અપવદતિ, તેનાપિ તૃપ્તિં ન ગત્વા સ્વયમપિ ભ્રાતૃન્ નાનુગૃહ્લાતિ યે ચાનુગ્રહીતુમિચ્છન્તિ તાન્ સમિતિતો ઽપિ બહિષ્કરોતિ।
XI હે પ્રિય, ત્વયા દુષ્કર્મ્મ નાનુક્રિયતાં કિન્તુ સત્કર્મ્મૈવ। યઃ સત્કર્મ્માચારી સ ઈશ્વરાત્ જાતઃ, યો દુષ્કર્મ્માચારી સ ઈશ્વરં ન દૃષ્ટવાન્।
XII દીમીત્રિયસ્ય પક્ષે સર્વ્વૈઃ સાક્ષ્યમ્ અદાયિ વિશેષતઃ સત્યમતેનાપિ, વયમપિ તત્પક્ષે સાક્ષ્યં દદ્મઃ, અસ્માકઞ્ચ સાક્ષ્યં સત્યમેવેતિ યૂયં જાનીથ।

XIII ત્વાં પ્રતિ મયા બહૂનિ લેખિતવ્યાનિ કિન્તુ મસીલેખનીભ્યાં લેખિતું
નેચ્છામિ।
XIV અચિરેણ ત્વાં દ્રક્ષ્યામીતિ મમ પ્રત્યાશાસ્તે તદાવાં સમ્મુખીભૂય
પરસ્પરં સમ્ભાષિષ્યાવહે।
XV તવ શાન્તિ ર્ભૂયાત્। અસ્માકં મિત્રાણિ ત્વાં નમસ્કારં જ્ઞાપયન્તિ
ત્વમપ્યેકૈકસ્ય નામ પ્રોચ્ય મિત્રેભ્યો નમસ્કુરુ। ઇતિ।

# Sanskrit Bible (NT) in Gujarati Script
## New Testament in Sanskrit Language; printed in Gujarati Script

copyright © 2018 SanskritBible.in

Language: Sanskrit

Contributor: SanskritBible.in

Thank you for your interest in Sanskrit Bible.
Sanskrit Bible (NT) is freely available in 22 different scripts of your choice. This edition is in Gujarati script and is based on the Sanskrit translation of the Holy Bible published by Calcutta Baptist Missionaries in 1851. Please visit SanskritBible.in to learn more about Sanskrit Bible and to download various free Christian literature.

This translation is made available to you under the terms of the Creative Commons Attribution Share-Alike license 4.0.
You have permission to share and redistribute this Bible translation in any format and to make reasonable revisions and adaptations of this translation, provided that:

- You include the above copyright and source information.
- If you make any changes to the text, you must indicate that you did so in a way that makes it clear that the original licensor is not necessarily endorsing your changes.
- If you redistribute this text, you must distribute your contributions under the same license as the original.

Pictures included with Scriptures and other documents on this site are licensed just for use with those Scriptures and documents. For other uses, please contact the respective copyright owners.

Note that in addition to the rules above, revising and adapting God's Word involves a great responsibility to be true to God's Word. See Revelation 22:18-19.

2020-01-01

---

PDF generated using Haiola and XeLaTeX on 11 Nov 2022 from source files dated 29 Jan 2022
e1290797-4477-53f0-873d-c9153a72fd01